श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ परागपद्धतिः त्रयोदशी ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ परागपद्धतिः त्रयोदशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

पान्तु वः पद्मनाभस्य पादुकाकेळिपांसवः।
अहल्यादेहनिर्माणपर्यायपरमाणवः ॥ 13.1 ॥

तव सञ्चरणाद्रजो विधूतं
यदिदं रङ्गनरेन्द्रपादरक्षे !।
अलमेतदनाविलानि कर्तुं
कतकक्षोद इवाशु मानसानि ॥ 13.2 ॥

पुनरुक्तपितामहानुभावाः
पुरुषाः केचिदमी पुनन्ति विश्वम्।
मधुवैरिपदारविन्दबन्धोः
अपरागास्तव पादुके ! परागैः ॥ 13.3 ॥

अभियुक्तजनो निजार्भकाणां
बहुशो रङ्गनरेन्द्रपादरक्षे !।
अवलेपपिशाचमोचनार्थं
रजसा लिम्पति तावकेन देहान् ॥ 13.4 ॥

शिरसा परिगृह्य लोकपालाः
तव रङ्गेश्वरपादुके ! रजांसि।

विषमेषु बलेषु दानवानां
    व्यपनीतान्यशिरस्त्रमाविशन्ति ॥ **13.5** ॥

कृतिनः शिरसा समुद्वहन्तः
    कतिचित्केशवपादुके ! रजस्ते।
रजसस्तमसोऽपि दूरभूतं
    परिपश्यन्ति विशुद्धमेव सत्त्वम् ॥ **13.6** ॥

अधिकं पदमाश्रितोऽपि वेधाः
    प्रयतो रङ्गधुरीणपादरक्षे !।
अभिवाञ्छति सङ्गमं परागैः
    अभिजातैस्तव देवि ! नाभिजातः ॥ **13.7** ॥

शुद्धसत्त्ववपुषैव भवत्या
    पादुके ! विरजसौ हरिपादौ।
अस्तु किं पुनरिदं रजसा ते
    शुद्धसत्त्वमयता मनुजानाम् ॥ **13.8** ॥

तद्रजस्तव तनोति पादुके !
    मानसान्यकठिनानि देहिनाम्।
प्रस्तरस्य पदवीगतस्य यत्
    व्याचकार मुनिधर्मदारताम् ॥ **13.9** ॥

रङ्गेशयस्य पुरुषस्य जगद्विभूत्यै
    रथ्यापरिक्रमविधौ मणिपादरक्षे !।
सीमन्तदेशमनवद्यसरस्वतीनां
    सिन्दूरयन्ति भवतीचरिताः परागाः ॥ **13.10** ॥

मान्येन रङ्गनृपतेर्मणिपादरक्षे !
    चूडापदानि रजसा तव भूषयन्तः।

कालक्रमेण भजतां कमलासनत्वं
  नाभीसरोजरजसां निवसन्ति मध्ये ॥ **13.11** ॥

मातर्मुकुन्दचरणावनि ! तावकीनाः
  चिन्तावशीकरणचूर्णविशेषकल्पाः।
सञ्चारपांसुकणिकाः शिरसा वहन्तो
  विश्वं पुनन्ति पदपद्मपरागलेशैः ॥ **13.12** ॥

आयोजितान्यमलधीभिरनन्यलभ्ये
  पादावनि ! श्रुतिवधूपटवासकृत्ये।
त्वत्सञ्चरप्रचलितानि रजांसि शौरेः
  प्रख्यापयन्ति पदपद्मपरागशोभाम् ॥ **13.13** ॥

मूर्धानमम्ब ! मुरभिन्मणिपादरक्षे !
  येषां कदाऽपि रजसा भवती पुनाति।
त्वामेव ते सुकृतिनः स्नपयन्ति काले
  मन्दारदामरजसा मकुटच्युतेन ॥ **13.14** ॥

रथ्याविहाररजसा परिधूसराङ्गीं
  रङ्गेश्वरस्य ललितेषु महोत्सवेषु।
प्रस्फोटयत्यवनतो मणिपादुके ! त्वां
  गौरीपतिः स्वयमिभाजिनपल्लवेन ॥ **13.15** ॥

नेदीयसां निजपरागनिवेशपूर्वं
  स्पृष्ट्वा शिरांसि भवती भवरोगभाजाम्।
गाढं निपीड्य गरुडध्वजपादरक्षे !
  मानग्रहं शमयतीव परैरसाध्यम् ॥ **13.16** ॥

आपातवल्लवतनोरकुमारयूनः
  पादावनि ! प्रविशतो यमुनानिकुञ्जान्।

आसीदनङ्गसमरात्पुरतः प्रवृत्तः
सेनापराग इव ते पदवीपरागः ॥ **13.17** ॥

गङ्गापगातटलतागृहमाश्रयन्त्याः
पादावनि ! प्रचलितं पदवीरजस्ते।
प्रायेण पावनतमं प्रणतस्य शम्भोः
उद्धूळनं किमपि नूतनमातनोति ॥ **13.18** ॥

अन्ते तदा त्वमविळम्बितमानयन्ती
रङ्गाद्भुजङ्गशयनं मणिपादरक्षे !।
कामं निवर्तयितुमर्हसि सज्ज्वरं मे
कर्पूरचूर्णपटलैरिव धूळिभिस्ते ॥ **13.19** ॥

रङ्गेशपादसहधर्मचरि ! त्वदीयान्
मौळौ निवेश्य महितान् पदवीपरागान्।
सन्तस्त्रिवर्गपदवीमतिलङ्घयन्तो
मौळौ पदं विदधते विबुधेश्वराणाम् ॥ **13.20** ॥

मातस्तदा माधवपादरक्षे !
त्वयि प्रसक्तं त्वरयोपयान्त्याम्।
परामृशेयं पदवीपरागं
प्राणैः प्रयाणाय समुज्जिहानैः ॥ **13.21** ॥

तथागता राघवपादरक्षे !
सम्पश्यमानेषु तपोधनेषु।
आसीदहल्या तव पांसुलेशैः
अपांसुलानां स्वयमग्रगण्या ॥ **13.22** ॥

पश्यामि पद्मेक्षणपादरक्षे !
भवाम्बुधिं पातुमिव प्रवृत्तान्।

भक्तोपयानत्वरया भवत्याः
    पर्यस्यमानान् पदवीपरागान्॥ **13.23** ॥

पञ्चायुधी भूषणमेव शौरेः
    यतस्तवैते मणिपादरक्षे !।
वितन्वते व्याप्तदिशः परागाः
    शान्तोदयान् शत्रुचमूपरागान्॥ **13.24** ॥

परिणतिमकठोरां प्राप्तया यत्प्रभावात्
    अलभत शिलया स्वान् गौतमो धर्मदारान्।
पुनरुपजनिशङ्कावारकं पादुके ! तत्
    प्रशमयति रजस्ते रागयोगं प्रजानाम्॥ **13.25** ॥

रजनिविगमकाले रामगाथां पठन्तः
    कुशिकतनयमुख्याः पादुके ! भावयन्ते।
उपलशकलसक्तैस्त्वत्परागैरकाण्डे
    जनितमुनिकळत्रान् दण्डकारण्यभागान्॥ **13.26** ॥

शुभसरणिरजोभिः शोभयन्ती धरित्रीं
    परिणतिरमणीयान् प्रक्षरन्ती पुमर्थान्।
भवसि भुवनवन्द्या पादुके ! रङ्गभर्तुः
    शरणमुपगतानां शाश्वती कामधेनुः॥ **13.27** ॥

पवनतरळितस्ते पादुके ! रङ्गभर्तुः
    विहरणसमयेषु व्याप्तविश्वः परागः।
विषमविषयवर्त्मव्याकुलानामजस्रं
    व्यपनयति जनानां वासनारेणुजालम्॥ **13.28** ॥

निष्प्रत्यूहमुपासिषीमहि मुहुर्निश्शेषदोषच्छिदो
    नित्यं रङ्गधुरन्धरस्य निगमस्तोमार्चिते पादुके !।

धत्ते मूर्धभिरादिपद्मजनिता तत्तादृशी सन्ततिः
यत्सञ्चारपवित्रितक्षितिरजः पङ्क्तिं चतुष्पञ्चषैः ॥ 13.29 ॥

रजसा परोरजस्तत् न खलु न लङ्घ्येत भगवतोऽपि पदम्।
किमुत हृदयं मदीयं भवती यदि नाम पादुके ! न स्यात् ॥ 13.30 ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे परागपद्धतिः त्रयोदशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥